प्रवेश सं० १८१६८ | विषयः पुराणेतिहासम् | क्रम सं०

नाम ज्येष्ठैकादशी माहात्म्यम् (कृष्णपक्षीयापरानाम्नी) (ब्रह्माण्डपुराणस्थम्) | ग्रन्थकार

पत्र सं० १-२

श्लोक सं० | अक्षर सं० (पंक्तौ) 42 | पंक्ति सं० (पृष्ठे) १०

आकारः ९.९" × ४.३ | लिपिः दे. ना. | आधारः का.

वि० विवरणम् पू०

14720

पी० एस० यू० पा०—७७ एम० सी० ई०—१९५१—५० ०००

क्र. २९८३ (३९८३)

Indira Gandhi National Centre for the Arts

ज्येष्ठ कृष्णएकादशी

६२९ - [illegible]

Indira Gandhi National
Centre for the Arts

ए·जे·कृ ॥श्रीगणेशाय नमः॥ युधिष्ठिर उवाच। ज्येष्ठस्य कृष्णपक्षे तु किंनामैकादशी भवेत्॥ श्रोतुमिच्छामि माहात्म्यं वद त्व
१ ं जनार्दन॥१॥ श्रीकृष्ण उवाच॥ साधु पृष्टं त्वया राजन् लोकानां हितकाम्यया॥ बहुपुण्यप्रदा ह्येषा महापात
४७ कनाशिनी॥२॥ अपरा नाम राजेंद्र अपारफलदायिनी॥ लोके प्रसिद्धतां याति अपरां येन सेविता॥३॥ ब्रह्महत्या
भिभूतोपि गोत्रहा भ्रूणहा तथा॥ परापवादवादी च परस्त्रीरसिकोपि च॥ अपरासेवनाद्राजन् विपाप्मा भवति ध्रुवं
माम ॥४॥ कूटसाक्षी मिनः कूटं तुला कूटं करोति यः॥ कूटं वेदं पठेद्विप्रः कूटशास्त्रं तथैव च॥५॥ ज्योतिषी कूटगण
कः कूटायुर्वेदिको भिषक्। कूटसाक्षिसमा ह्येते विज्ञेया नारकौकसः॥६॥ अपरासेवनाद्राजन् पापमुक्ता
भवंति ते॥ क्षत्रियः क्षात्रधर्मा यस्त्यक्त्वा युद्धं पलायते॥७॥ स याति नरकं घोरं स्वीयधर्मबहिःकृतः॥ अप
रासेवनात्सोपि पापं त्यक्त्वा दिवं व्रजेत्॥८॥ विद्यामधीत्य यः शिष्यो गुरुनिंदां करोति च। स महापातकयुतो
निरयं याति दारुणं॥९॥ अपरासेवनात्सोपि सद्गतिं प्राप्नुयान्नरः पैं महिमानमपरायाः शृणु राजन्नरा राम
न्म्यहं। पुष्करे त्रितये स्नात्वा कार्तिक्यां यत्फलं लभेत्॥११॥ मकरस्थे रवौ माघे प्रयागे यत्फलं नृणां काश्यां १

ए·ज्ये·कृ पत्त्राप्यते पुण्यं शिवरात्रेरुपोषणे॥१२॥ गयायां पिंडदानेन पितृणां पितृतोषणा॥ सिंहस्थिते देवगुरौ गौत
२ मीस्नानतो नरः॥१३॥ यत्फलं समवाप्नोति कुंभे केदारदर्शनात्॥ बदर्याश्रमयात्राणां तत्तीर्थवसनादपि
४८ ॥१४॥ यत्फलं समवाप्नोति कुरुक्षेत्रे रविग्रहे॥ गजाश्वहेमदानानि कृत्वा क्षेत्रसुवर्णादि॥१५॥ नरस्तत्फ
लमाप्नोति अपराव्रतसेवनात्। पापद्रुमकुठारीयं पापेंधनदवानला॥१६॥ पापांधकारतरणी पाप
मातंगकेसरी। बुद्बुदा इव तोयेषु पुत्तिका इव जंतुषु॥१७॥ जायंते मरणायैव एकादश्या व्रतं विना। अप
रां समुपोष्यैव पूजयित्वा त्रिविक्रमं॥१८॥ सर्वपापविनिर्मुक्तो विष्णुलोकं व्रजेन्नरः लोकानां च हि
तार्थाय तवाग्रे कथितं मया॥१९॥ पठनाच्छ्रवणाद्राजन् सर्वपापैः प्रमुच्यते॥ इति श्रीब्रह्मांडपुरा राम
णे ज्येष्ठकृष्णे अपरामाहात्म्यं॥ ॥समाप्तं॥ ॥ २

Indira Gandhi National Centre for the Arts